# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-३ (SEM-5) | प्रश्नपत्र-४ | गुणाः - ७० |
| विषयः- साहित्यम् | Old Course | समयः - ११ तः ०२ |
| दिनाङ्कः - २८/११/२०१६ | सन्दर्भग्रन्थः - कादम्बरी ( कथामुखम् ) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः व्याख्या कार्या । ०८**

१. नमामि भर्वोश्चरणाम्बुजद्वयं सशेखरैर्मौखरिभिः कृतार्च्यनम् ।
समस्तसामन्तकिरीटवेदिकाविटङ्कपीठोल्लुठितारुणाङ्गुलि ॥

२. आसीत् धैरेयः साहसिकानाम्, अग्रणी विदग्धानाम्, वैनतेय इव विनतानन्दजननः, वैन्य इव चापकोटिसमुत्सारितसकलारातिकुलाचलो राजा शूद्रको नाम ।

३. ताभिश्च समुन्नत-कुचकुम्भ-मण्डलाभिर्वारिमध्यप्रविष्टकरिणीभिरिव वनकरी परिवृत्तस्तत्क्षणं रराज राजा ।

**प्र-२ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत । ०८**

१. ग्रन्थोक्तदिशा शूद्रकवर्णनं लिखन्तु ।

२. संस्कृतगद्यस्य विशेषताः प्रतिपादयन्तु ।

**प्र-३ द्वयोः टिप्पणी लेख्या । ०४**

१. कथामुखसारः ।

२. गद्यविकासः ।

३. बाणभट्टः ।

४. बाणग्रन्थाः ।

**प्र-५ पञ्चानम् एकवाक्येन उत्तरं लिखन्तु । ०५**

१. कादम्बर्याः नायिका का?

२. शूद्रकस्य राजधानी का?

३. शुकं गृहीत्वा का आगतवती?

४. अहो! विघातुरस्थाने रूपनिष्पादनप्रयत्नः - इति कस्य मनसि समुत्पन्नम्?

५. काः यथायथं राजानम् अभिषिषिचुः?

६. शुकस्य नाम किम्?

७. शूद्रकस्य विमले कृपाणधाराजले का चिरम् उवास?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ द्वयोः गद्यखण्डयोः ससन्दर्भं व्याख्या कार्या । ०८**

१. तत्र च शयने निषण्णः क्षितितलोपविष्टया शनैः शनैः सत्सङ्ग-निहितासिलतया खड्गवाहिन्या करसम्पुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन् मुहूर्तनिवासाञ्चक्रे ।

२. यत्र च विकच-कुवलय-प्रभा-श्यामायमान-पक्ष-पुटान्यद्यापि मूर्तिमद्रामशापग्रस्तानीव मध्यचारिणामालोक्यन्ते चक्रवाकनाम्नां पक्षिणां मिथुनानि ।

३. आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया जर्ज्जरित-कर्णविवरो भयविह्वलः समीपवर्तिनः पितुः प्रतीकारबुद्ध्या जराशिथिलपक्षपुटान्तरमविशम्।

**प्र-६ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लेख्यम्। ०८**

१. ग्रन्थोक्तदिशा शाल्मलीतरुवर्णनं कुर्वन्तु।

२. शुकजन्मवृत्तान्तं ग्रन्थोक्तदिशा लिखन्तु।

**प्र-७ टिप्पणी लेख्या।( द्वयोः ) ०४**

१. पम्पासरसः वर्णनम्।

२. विन्ध्याटवी।

३. शूद्रकसभामण्डपगमनवर्णनम्।

४. अगत्स्यः।

**प्र-८ पञ्चानामेकवाक्येन उत्तरं लिखन्तु। ०५**

१. लोपामुद्रा का?

२. आगस्त्यस्य पुत्रः कः?

३. कस्य तरोः कोटरे शुकजन्म अभवत्?

४. शबरसेनापतेः किम् अभिधानम्?

५. के काननम् उत्खातमूलमशेषतः कुर्वन्ति स्म?

६. शबराणाम् आहारः कः?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः व्याख्या कार्या। ०८**

१. तातस्तु मां तत्कालोचितप्रतीकारं मन्यमानः स्नेहपरवशोमद्रक्षणाकुलः किंकर्तव्यताविमूढः क्रोडभागेन मामवष्टभ्य तस्थौ।

२. उपसृत्य च जल-समीपमेकदेश-निहित-दण्ड-कमण्डलुरादाय स्वयं मां मुक्तप्रयत्नम् उत्तानितमुखम् अङ्गुल्या कतिचित् सलिल-बिन्दूनपाययत्।

३. यत्र च महाभारते शिखण्डिनां नृत्यपक्षपातः भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः, मूलानामधोगतिः।

**प्र-१० एकस्य निबन्धात्मकमुत्तरं लिखन्तु। ०८**

१. जाबालि-आश्रमवर्णनं कुर्वन्तु।

२. ग्रन्थोक्तदिशा हारीतवर्णनं कुर्वन्तु।

**प्र-११ एका टिप्पणी लेख्या। ०२**

१. जाबालिः।

२. रात्रिवर्णनम्।

**प्र-११ द्वौ प्रश्नौ एकवाक्येन समाधेयौ। ०२**

१. शुकं सरस्तीरं कः प्रापयत्?

२. दिवसकरः कः?

३. अहो! मोहप्रायमेषां जीवितम् - इति कस्य मनसि समुत्पन्नम्?